International Journal of Applied Research 2020; 6(2): 53-55



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2020; 6(2): 53-55
www.allresearchjournal.com
Received: 12-12-2019
Accepted: 18-01-2020

**दिपेश कुमार चौधरी**
शोधार्थी, का. सिं. द. सं. वि. वि.
कामेश्वरनगर, दरभंगा, बिहार, भारत

**Corresponding Author:**
**दिपेश कुमार चौधरी**
शोधार्थी, का. सिं. द. सं. वि. वि.
कामेश्वरनगर, दरभंगा, बिहार, भारत

# व्याकरणशास्त्रस्य अध्ययनम्

## दिपेश कुमार चौधरी

**प्रस्तावनाः**

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्, करणे, ल्युट् प्रत्ययः। व्याकरण मधीयते विदन्तीति वा वैयाकरणाः। सिद्धः वादिप्रतिवादिभ्यां निर्णीतोऽन्तोः अवसानं येषान्ते सिद्धान्ताः। वैयाकरणानां सिद्धान्ता वैयाकरण सिद्धान्ताः। कौ पृथिव्यां मोदते इति कौमुदी। वैयाकरणसिद्धान्तानां कौमुदी वैयाकरणसिद्धान्तकौमुदी। सिद्धान्तप्रकात्शकत्वेनाऽति दुरूहग्रन्थान्तरेभ्यः सिद्धान्त ज्ञाने जायमानस्य क्लेश रूपसन्तापस्य शामकत्वेन च कौमुदी सादृश्यम्। भट्टोजिदीक्षतेन विरचितं सिद्धान्तकौमुदी प्रक्रिया ग्रन्थोऽस्ति। तत्र प्रक्रियाक्रमेण निम्नाताः त्रिसप्ततिविषयाः विवृताः ।

शब्द व्युत्पत्तिशास्त्र रूपेण सर्वथा व्याकरणं प्रतिष्ठितम् पद पाठार्थ व्याकरणमागश्यकम्, पदानां विभाजनं व्युत्पत्यादिद्वारा प्रकृति–प्रत्यय विभागादि द्वारा च सूक्ष्मज्ञानं व्याकरणशास्त्रेण संभवति। भाषा हि जनानां भावाभिव्यक्तये सशक्तं साधनम्। अन्येरपि चेष्टादिभिः साधनैर्भावाभिव्यक्तिस्तु संभवति, किन्तु न तत्र सम्पूर्णता व्याकरणेन विना संभवति। भाषा हि समुदायस्य महान वाङ्निधिः उक्तञ्च– ''तां विश्वरूपाः पशवो वदन्ति''[1] इति विश्वरूपाः इति समुदाय –सम्बद्धाः पशव इति प्राणिनाम् उपलक्षणाज्जनाः वदन्ति इति सुखेनोच्चारणं कुर्वन्ति। अनेन भाषायाः स्वरूपं व्याख्यातं भवति। या खलु वाक् कण्ठताल्वादि भिरूच्चारण–स्थानैरूच्चार्यते, या च केनचित् समुदायेन भावस्य स्पष्ट मभि व्यक्तये प्रयुज्यत इति। अर्थात् उच्चारणावयवेम्यः समुच्चारितानां सार्थक–ध्वनि– समूहानां समाष्टिरेव भाषा भाष्यते। एवञ्च भाषात्व–सिद्धये चतुर्णा तत्वानामुपस्थितिरावश्यकी भवति तानि चेमानि सन्ति–

1. जनानां मुखताल्वादिभ्य उच्चारणावनवेभ्यः समुच्चारितानां सर्पक ध्वनि–समुदायानां समष्टिरेव भाषा भवति।
2. ताञ्य कश्चित समुदायः स्वगत भावानां समग्राभिव्यक्तये प्रयुनक्ति।
3. तस्याश्चैका विशिष्ट प्रक्रिया भवति या विवेचनीया निरूपणीया च भवति। सा च समुदायस्य भावसम्बद्धत्वात् सतत् परिवर्तन–शीला विकासोन्मुखी भवति। तादृशञ्य परिवर्तनमपि व्याकरणादि नियमात् एव भवति न तु यथेच्छनिति।

**सक्ल शास्त्र–** शिरो भूतं वेदपुरूषस्य मुखत्वेन स्मृतं विद्यते। तत्तु कदा प्रवर्तितमभूदिति न शक्यते तत्वतो निरूपयितुम्। तथापि पण्डिताः कथयन्ति यद् व्याकरणस्य बीजं वैदिक–संहितासु दृश्यते। तत्र एतादृशः अनेके मन्त्राः सन्ति येषु पदानां व्युत्पत्तिः उपलभ्यते। एवञ्य ते अस्य सिद्धान्तस्य पोषकाः सन्ति। व्याकरणस्येतिहासस्यानुसारेण एते मंत्राः विभिन्नानां वेदानां सन्ति, यैः व्याकरण सिद्धान्तस्य परिपोषणं भवति। यथा–

यज्ञेन यज्ञमाजन्त देवः''[2] ये सहांसि सहसासहन्ते''[3] ''स्तोतृभ्यो महंते मद्यम्''[4], पूर्वोश्नन्ताश्विन''[5] ''धान्यमसि धिनुहि देवान्''[6] केतपूः केतं नः पुनातु'[7] ''येन देवाः पवित्रेणात्यानं पुयते सदा''[8] तीर्थस्तरन्ति''[9] ''यददः सं प्रयतीरहावन दत्ता हते तस्मादा नद्यो नामस्थ''[10] ''तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनुष्ठन्''[11] एवमेवोक्तं'' दृष्ट्वा रूपे व्याकरोत् सत्यानृते– प्रजापतिः'[12] संहितानन्तरं ब्राह्मणसाहित्येऽपि व्याकरणस्तित्वाविषये बहुधोक्तमस्ति। अनेनैत्सिद्धयति यत् संहिताकाले एतद् व्याकरणं सुव्यवस्थितमासीत्। तथ्यमिदं पतञ्जलिः स्मरति ''पुराकल्पे एतदासीत् संस्कारोत्तर कालं ब्राह्मण व्याकरणं स्माधीयते''[13] इति यद्यपि पुराकल्पस्य कियत्प्राचीनत्वमिति नैव सुस्पष्टं तथापि न्यूनतम मपि एतस्य संहिताकालत्वं संभवति। यथा–

''पुरा कल्पे तु नारीणां मौञ्जी वचनभिष्यते।
अध्यापने च वेदानां सावित्री वचनं तथा।।[14]
..... अनावृताः किल पुरा स्त्रिय आसन् वरानने।[15]

**इत्यादायपि पुराकल्प–**पुराशब्दौ व तीतकाल व बोधकावेन। गोपथ–ब्राह्मणे व्याकरणस्य स्पष्टमेव व्याख्यानमस्ति। यथा– ''ओकांर पृच्छाना, को धातुः किं प्रतिपादिके, किं नामाख्यातं,किं लिंक कि वचने, नम विभक्तिः, कः प्रत्ययः, कः स्वरः उपसर्गो निपातः, किं वै व्याकरणं को विकरः , को विकारी, कति मात्राः,कति वर्णाः, कत्यक्षराः, कतिपदाः , कः संयोगः, किं स्थाननाप्रदानानुकरणम्[16] इति।

**तथैव मैत्रायणी संहितायामुक्तम्–** व तस्मात् षड् विभक्तयः[17] ऐतरेय ब्राह्मणेऽपि ''सप्तधा वै वागभवत्''[18] इति। सप्तद्या इति सप्तविभक्तयः[19] इत्यत्र सप्त सिन्धव इति सप्तविभक्तयः इति।

**तेन व्याकरणस्य समस्त–** द्वैपायन– परम्परार्ष वैदिक वा यादपि प्राचीन– तमत्वमिति युधिष्ठिरमीमांसक मतमत्यन्तमेवसभीचीनं प्रतिभाति। तथ्यमिदं यत् संस्कृतभाषायाम् आदौ यौगिकपदानां बाहुल्यमासीत्। रूढ़िमाभिता इति। यौगिकतास्याः स्वभावसिद्धा, सा च प्रकृति– प्रत्यय– विभागे नैव ज्ञायते। प्रतिपद– पाठादेव भाषा ज्ञानस्या संभवात्तत्वदानां प्रकृतिप्रत्ययविभागेन सामान्यीकरणं यदैवानु भूतं तदैव व्याकरणं प्रवर्तितम्। एतत् प्रवर्तनञ्चय यदि मूल–संहिता प्राक् काले न संभवति चेदपि तत्सहैव तु निश्चय मेव।

**तेन व्याकरणस्य मूल–संहिता** –कालादारभ्य पतञ्जलेः पूर्वं प्रवर्तनकालः तदनन्तरं व्याख्यानकाल उदेति। सम्प्रति अस्य स एव सञ्चरति प्रक्रियामुखेन। तर्हि केन प्रथमं तादृशं सर्वशास्त्रशिरोरत्नभूतं व्याकरणं प्रवर्तितमित्यापेक्षायामितरशास्त्रप्रवर्तन – मिवास्यापि प्रवर्तनं ब्राह्मण एवं संजातं मन्यन्ते परिनिष्ठतवैयाकरणाः पतञ्जलिप्रभृतयः व्याकरण–प्रवर्तन–क्रयं निर्देशन् स कथयति महाभाष्ये –''ब्रह्मा वृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो[20] भारद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः'' इति।

विषयेऽस्मिन्नपरमपि मतं प्रचलितमस्ति यन्महेश्वरो वेदाषड ान्युद्धृत्य प्रोवा चेति।[21] अत्र षडाानि एकतः शिक्षा–कल्पादीनि षट्अपरतस्तु षड् विभाकितमयं, लट्–लिङ्–लुङ्–लुट् लृडादिषड लकार–प्राधान्यं, त्रिगुणितषडाख्यातमयं, कतृ–कर्म–भाव–कर्मकर्तृ–कृत्य–कृदन्तमय्स्वरूपं, षट्कारकमंडित, षट् समास मयं, अपत्यादिमुख्यषट् प्रत्ययविग्रहं व्याकरणमपि बुध्यते। तत्र ब्रह्मणाप्रोक्तं व्याकरणं वृहस्पतिर धीतवान्। स चेन्द्राय प्रोवाच, वृहस्पति, कालपर्यतमपि वाग्व्याकृतैवासीत्। तेनैववृहस्पतिः, प्रतिपदपाठमेवाध्यापयामासेन्द्रम्। इन्द्रोह, देवानामग्रणीः स हि स्वाधीतं देवेभ्यः प्रोवाच। देवा वै तदवधातुमसमर्थाः सन्तो तद व्याकरणायेन्द्रं प्रोचुः। इन्द्रो ह तां वाचं मध्यतोऽवक्रम्य व्याकरोत्। स च प्रकृति प्रत्ययभागेन शब्दसिद्धिं व्याख्यातवान्। यथाह सामणाचार्यः – ''तामखण्डां वाचं मध्ये विच्छिद्य प्रकृति प्रत्ययविभागं सर्वत्राकरोत्'' तेनेन्द्रो हि प्रथमो वैयाकरणः, कातन्त्रादीनि हि व्याकरणानि तस्य शाखा–प्रशाखा –रूपाणि।

एवमेव वेदात्षड्ंान्युधृत्य महेश्वरः सदाशिवोऽक्षरसमान्नाय–निर्देशपूर्वकं व्याकरणमुपदिष्टवान्। पाणिन्यादयो हि तस्य व्याख्यातारः। व्याकरणप्रवर्तने इन्द्र–महेश्वरयोः कतरं प्रथम इत्यपेक्षायां सारस्वत्भाष्ये उक्तं यत्–

''समुद्रवद् व्याकरणं महेश्वरे तदर्द्व –कुम्भोद्धहरणं वृहस्पतौ।
त ागधेयञ्च शतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ।[22]

अनेन तु इन्द्रापेक्षया बार्हस्यत्यस्य तदपेक्षयाऽपि माहेश्वरस्य व्याकरणस्य प्राचीनत्वं विशालता च सिद्धयति।

लौकिक–व्याकरणं प्रथमस्तु द्विधा विभक्तं सच्छान्दसं लौकिकमात्रञ्च।।
तत्र सच्छान्दसं पाणिनीयं लौकिकमात्रं कातन्त्रादि इति तु पूर्वमेवोक्तम्।।

लौकिक–व्याकरणस्य बहवो भेदा आचार्यै स्मार्यन्तो साम्प्रत्यपि अष्टाधिका व्याकरणपरम्पराः प्रवर्तिता दृश्यन्ते। तेस्वापि प्राधान्येन अष्टौ नवैव वा गृहीताः सन्ति, शेषास्तु तटसम्बद्धः एव। अष्टौ व्याकरणानि यथा–

ब्राह्मैशानमेन्द्रश्च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टमम्।।
मतान्तरे– यस्मिन्न् व्याकरणान्यष्टौ निरूप्यन्ते महन्ति च।
तत्राद्यं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते।।
तृतीयं याम्यमाख्यातं चतुर्थं रौद्रमुच्यते।।
वायव्यं पञ्चमं प्रोक्तं षष्ठं वारूणमुच्यते।।
सप्तमं सौम्यभाख्यातमष्टमं वैष्णवं तथा।

**वोपदेवस्त्वाह–**

इन्द्रश्चन्द्रः काशकृत्स्नाऽपिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः।।
अपि च– ऐन्द्रं चान्द्रं काशकृत्स्नं कौशारं शाकटायनम्।
सारस्वतं चापिशालं शाकलं पाणिनीयकम्।।इति।

**सन्दर्भ ग्रंथ सूची :**


1. ऋग्वेद।
2. ऋग्वेद–1/167/50
3. ऋग्वेद–6/66/9
4. तत्रैव–1/9/3।
5. तत्रैव–8/5/31
6. यजुर्वेद–1/20
7. तत्रैव–11/7/
8. सामवेद–305/2/8/5
9. अथर्ववेद–18/4/7
10. तत्रैव–3/13/9
11. तत्रैव–3/13/2
12. यजुर्वेदः–19/77/
13. महाभाष्यम्–1/1/11
14. संहिता।
15. गोपथ ब्राह्मणम्–1/24।
16. मैत्रायणी संहिता–1/7/3
17. ऐतरेय–ब्राह्मणम्–71/7 ।
18. ऋग्वेद–8/69/12
19. महाभाष्यम्–1/4
20. तत्रैव–12/287/192।
21. सारस्वतभाष्यम् ।
22. महाभाष्यम्–1/6